तोयधिप्रियं, क्ली, (प्रीणातीति । प्री+"इगुपधेति ।" ३।१।१३५। इति कः । तोयधिः प्रियो यस्य ।) लवङ्गम् । इति शब्दचन्द्रिका ॥

तोयनिधिः, पुं, (तोयानि निधीयन्तेऽत्र । नि+धा+किः । तोयानां निधिर्वा ।) समुद्रः । इति शब्दरत्नावली ॥ (यथा, कुमारे । १ । १ ।
"पूर्व्वापरौ तोयनिधी वगाह्य
स्थितः पृथिव्या इव मानदण्डः ॥")

तोयपिप्पली, स्त्री, (तोये जले पिप्पलीव ।) काँचड़ा इति ख्यातजलजशाकभेदः । तत्पर्य्यायः । लाङ्गली २ शारदी ३ शकुलादनी ४ । इत्यमरः । २ । ४ । १११ ॥

तोयपुष्पी, स्त्री, (तोयेन बहुजलप्रदानेन पुष्पाणि यस्याः ।) पाटलावृक्षः । इति शब्दमाला ॥

तोयप्रसादनं, क्ली, (प्रसादयतीति । प्र+सद्+णिच्+ल्युः । तोयस्य प्रसादनम् । अस्य फलयोगेन जलस्य निर्म्मलत्वं भवतीति तथात्वम् ।) कतकम् । इति भूरिप्रयोगः ॥

तोयप्रसादनफलं, क्ली, (तोयप्रसादनस्य तोयप्रसादनाय वा फलम् ।) कतकफलम् । इति रत्नमाला ॥

तोयफला, स्त्री, (तोयप्रधानं फलं यस्याः ।) इर्व्वारुः । इति राजनिर्घण्टः ॥

तोयवल्ली, स्त्री, (तोये जलप्रधानस्थाने वल्ली लतासन्ततिर्यस्याः ।) कारवेल्लः । इति रत्नमाला ॥ उच्छे इति भाषा ॥

तोयशुक्तिका, स्त्री, (तोयजाता शुक्तिका । शाकपार्थिवादिवत् समासः ।) जलशुक्तिः । इति राजनिर्घण्टः ॥

तोयसूचकः, पुं, (तोयं जलवर्षणं सूचयति रवेणेति । सूच्+ण्वुल् ।) भेकः । इति शब्दार्थकल्पतरुः ॥

तोयाधिवासिनी, स्त्री, (तोयं जलप्रधानस्थलं अधिवसतीति । अधि+वस+णिनिः । यद्वा, तोयेन अधिवास इव संस्कारोऽस्यस्येति । इनिः ।) पाटलावृक्षः । इति रत्नमाला ॥ तोयादिवासिन्यपि पाठः ॥ (पाटलाशब्देऽस्या विवृतिर्ज्ञातव्या ॥)

तोरणं, क्ली, (तोलयति उन्नमयति मस्तकमिति । तुल+ल्युः । लस्य रः ।) कन्धरा । कण्ठी । इति हारावली । १७४ ॥

तोरणः, पुं क्ली, (तुतोर्त्ति त्वरया गच्छत्यनेनेति । तुर त्वरणे + करणे ल्युट् ।) बहिर्द्वारम् । इत्यमरः । २ । ३ । १६ ॥ (यथा, कुमारे । ७ । ३ ।
"भासोज्ज्वलत्काञ्चनतोरणानां
स्थानान्तरं स्वर्ग इवावभासे ॥")
मलद्वाराद्वाह्यद्वारम् । इति कोक्कटादयः ॥ द्वाराग्रे निखातस्तम्भयोरुपरिनिबद्धं नानावस्त्ररत्नादिमयं धनुराकारं यद्वस्तु तत् तोरणमिति बहवः ॥ उपरिस्रगादियुक्तस्तम्भादिद्वयनिर्म्मितपुरादिबहिर्द्वारम् । इति साङ्गः ॥

मन्थनमालेति ख्यातं इति केचित् । इत्यमरटीकायां भरतः ॥ (महादेवे, पुं । यथा, महाभारते । १३ । १७ । ११७ ।
"तोरणस्तारणो वातः परिधीपतिखेचरः ॥")

तोलं, क्ली पुं, (तुल्यते परिमीयते इति । तुल+कर्म्मणि घञ् ।) तोलकम् । यथा,—
"एकतोलं द्वितोलं वा त्रितोलं वेदतोलकम् ।
इतोऽधिकं नरः कृत्वा प्रायश्चित्तीयते ध्रुवम् ॥"
इत्यागमः ॥

तोलकं, क्ली पुं, (तोलमेव+स्वार्थे कन् ।) शाणद्वयमानम् । इति शब्दमाला ॥ अशीतिरक्तिपरिमाणम् । तत्तु षोड़शमाषकः माषवतिरक्तिपरिमाणश्च । तोला इति भरि इति च भाषा । तत्पर्य्यायः । कोलम् २ द्रङ्क्षणम् ३ वटकम् ४ कर्षार्द्धम् ५ । इति वैद्यकपरिभाषा । कर्षम् ६ । इति लीलावती ॥ (यथा, वैद्यकरसेन्द्रसारसंग्रहे ज्वराधिकारे बृहज्ज्वरान्तके ।
"रसं गन्धं तोलकञ्च जातीकोषफले तथा ।"
"किराततिक्तकं चालं तोलकञ्च समाहरेत् ॥")

तोषः, पुं, (तुष सन्तोषे+भावे घञ् ।) तुष्टिः । इति धरणिः ॥ (यथा,—
"देवश्च परमं तोषं जगाम च सहोमया ॥"
इति हरिवंशे । १७३ । १३ ॥
स्वायम्भुवमन्वन्तरगततुषितानां देवानामन्यतमः । यथा, भागवते । ४ । १ । ७ ।
"तोषः प्रतोषः सन्तोषो भद्रः शान्तिरिड़स्पतिः ।
इध्मः कविर्विभुः स्वाह्नः सुदेवो रोचनो द्विषट् ।
तुषिता नाम ते देवा आसन् स्वायम्भुवान्तरे ॥")

तौच्छिकः, पुं, धनूराशिः । इति दीपिका ॥ (यथा, दीपिकायाम् ।
"क्रियतावुरिजित्तमकुलीरलेयपाथेययूककौर्पाख्याः ।
तौच्छिक आकोकेरो हृद्रोगश्चान्त्यभं चेत्यम् ॥")

तौतातिकं, क्ली, (तुतातेन निर्वृत्तम् । तुतात+"तेन निर्वृत्तम् ।" ५ । १ । ७९ । इति ठक् ।) तुतातभट्टकृतशास्त्रम् । यथा,—
"नैवाश्रावि गुरोर्म्मतं न विदितं तौतातिकं दर्शनम् ।
तत्त्वं ज्ञातमहो न शालिकगिरां वाचस्पतेः का कथा ॥"
इति प्रबोधचन्द्रोदयः । २ । ३ ॥

तौतिकं, क्ली, मुक्ता । इति राजनिर्घण्टः ॥

तौतिकः, पुं, शुक्तिः । इति राजनिर्घण्टः ॥

तौर्य्यं, क्ली, (तूर्य्ये मुरजादौ भवम् । तूर्य्य+अण् ।) तूर्य्ये मुरजादौ भवं शब्दरूपम् । इत्यमरटीकायां भरतः ॥

तौर्य्यत्रिकं, क्ली, (त्रयोऽंशा यस्य तत् । त्रि+"संख्याया अतिशदन्तायाः कन् ।" ५।१।२२ । इति कन् । तौर्य्योपलक्षितं त्रिकम् ।) नृत्यगीतवाद्यमिदं समुदितं त्रयं नाम्नश्च । इत्यमरः । १ । ७ । १० ॥ नटसम्बन्धि नृत्यगीतवाद्यमिति त्रयम् । इति तट्टीकासारसुन्दरी ॥ (यथा, मनुः । ७ । ४७ ।
"मृगयाक्षो दिवास्वप्नः परिवादः स्त्रियो मदः ।
तौर्य्यत्रिकं वृथाट्या च कामजो दशको गणः ॥")
विष्णुगृहे गीतवाद्यनृत्यफलं यथा,—
"गायनं ये प्रकुर्व्वन्ति मम कर्म्मपरायणाः ।
तेषां यद्यत् फलं भूमे ! शृणुष्व गदतो मम ॥
यावन्ति चाक्षराण्येव गीयमाने यशस्विनि ! ।
तावद्वर्षसहस्राणि इन्द्रलोके महीयते ॥
रूपवान् गुणवान् सिद्धः सर्व्ववेदविदां वरः ।
नित्यं पश्यति वै वज्रपाणिं देवं न संशयः ॥
मद्भक्तश्चैव जायेत इन्द्रलोकपथे स्थितः ।
सर्व्वकर्म्मगुणश्रेष्ठस्तत्रापि मम पूजकः ॥
इन्द्रलोकात् परिभ्रष्टो मम गीतपरायणः ।
प्रमुक्तः सर्व्वसंसारान्मम लोकाय गच्छति ॥
यस्तु गायति सुश्रोणि ! कौतुदाश्चैव द्वादशीम् ।
सर्व्वसङ्गं परित्यज्य मम लोकाय गच्छति ॥
यस्तु गायति गीतानि मम जागरणे सदा ।
सर्व्वसङ्गात् प्रमुक्तो वै मम लोकाय गच्छति ॥
एतत्ते कथितं देवि ! गायनस्य फलं महत् ।
यस्य गीतस्य शब्देन तरेत् संसारसागरम् ॥*॥
वादित्रस्य प्रवक्ष्यामि तत् शृणुष्व वसुन्धरे ! ।
प्राप्तवान्मनुजो येन देवेभ्यः समतां स्वयम् ॥
सम्यत्कालप्रयोगेण सन्निपातेन वा पुनः ।
नववर्षसहस्राणि नववर्षशतानि च ॥
कुवेरभवनं गत्वा मोदते वै यदृच्छया ।
कुवेरभवनाद्भ्रष्टः स्वच्छन्दगमनालयः ॥
शम्यादितालसम्पातैर्मम लोकाय गच्छति ॥ * ॥
नृत्यमानस्य वक्ष्यामि तच्छृणुष्व वसुन्धरे ! ।
मनुजा येन गच्छन्ति छित्वा संसारसागरम् ॥
त्रिंशद्वर्षसहस्राणि त्रिंशद्वर्षशतानि च ।
पुष्करद्वीपमासाद्य स्वच्छन्दगमनालयः ॥
फलं प्राप्नोति सुश्रोणि ! मम कर्म्मपरायणः ।
रूपवान् गुणवान् शूरः शीलवान् सुपथे स्थितः ॥
मद्भक्तश्चैव जायेत संसारपरिमोचितः ॥ * ॥
यस्तु जागरतो नित्यं गीतवाद्येन नर्त्तकः ।
जम्बुद्वीपं समासाद्य राजराजस्तु जायते ॥
सर्व्वकर्म्मसमायुक्तो रचिता वै महीपतिः ।
मद्भक्तश्चैव जायेत मम कर्म्मपरायणः ॥"
इति वराहपुराणम् ॥

तौलं, क्ली, (तुला एव । स्वार्थे अण् । स्वार्थिका अपि प्रत्ययाः क्वचित् प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्ते इत्युक्तेरस्य क्लीवत्वम् ।) तुला । तुलाराशौ, पुं । तौली । इति ज्योतिषम् ॥

तौलिकः, पुं, (तुल्या तुलिकया जीवतीति । तुलि+ठक् ।) चित्रकारः । इति शब्दमाला ॥ (तुलानिर्वृत्ते, त्रि । यथा, सुश्रुते चिकित्सितस्थाने १३ अध्याये ।
"शतं शतं तुलायास्तु सहस्रं दशतौलिके ॥")

तौलिकिकः, पुं, (तुलिकया जीवतीति । तुलिका+ठक् ।) चित्रकारः । तत्पर्य्यायः । रङ्गाजीवः २ चित्रकृत् ३ । इति हेमचन्द्रः । ३ । ५८५ ॥ तौलिकः ४ । इति शब्दमाला ॥